National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
**NJHSR 2025;** 1(61): 182-184
© 2025 NJHSR
www.sanskritarticle.com

**अङ्किता जायसवाल**
अनुसन्धात्री,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-
विद्यालयः, नवदेहली – 110016

**Correspondence:**
**अङ्किता जायसवाल**
अनुसन्धात्री,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-
विद्यालयः, नवदेहली – 110016

# केनोपनिषदोऽर्थवर्णने वैष्णवाचार्याणां दृष्टिः योगदानञ्च

**अङ्किता जायसवाल**

वेदानामन्तः यस्मिन् सः वेदान्तः। अन्तशब्दस्य निश्चयः, निर्णय इति अर्थाः भवन्ति। वेदान्तः तादृशी विद्या अस्ति यया वेदस्य अन्तिमध्येयस्य ज्ञानं लभ्यते। यथा वेदाः ब्रह्मात्मविषयाः। कदाचिद्वेदानां सारभूतोऽर्थं लक्ष्यभूतोऽर्थो वा वेदान्त इति विदुषामभिप्रायः। एतद्दर्शनम् "उत्तरमीमांसा" इत्यप्युच्यते। मीमांसायाः प्रथमो भागः कर्ममीमांसा इत्युच्यते। उत्तरभागस्तु वेदान्तभागः "ब्रह्ममीमांसा" वा "शारीरकमीमांसा" नाम्ना अभिधीयते। एतन्निर्णायिकशास्त्रमित्यपि समालोचकैः कथ्यते। ज्ञानयोगस्य एका शाखा वेदान्तः। अस्य मूलस्रोतांसि वेदः, उपनिषद्, आरण्यकग्रन्थाङ भवन्ति। अपि च वेदान्तो नाम - जीवब्रह्माभेदबोधक वाक्यमिति, रहस्यविद्या इति, उपनिषदिति, ब्रह्मविद्याप्रतिपादकं शास्त्रमिति, मोक्षशास्त्रमिति व निगदन्ति विद्वांसः। वेदान्तशब्दार्थः उपनिषद् इत्यर्थमुपष्टम्भयति। कठोपनिषदि श्रीमत्शङ्करभगवत्पादैः भाष्ये एवमुल्लिखितम् सदेर्धातोर्विशरण-गत्यवसादनार्थस्य उप-नि-पूर्वस्य क्विप्प्रत्ययान्तस्य रूपमिदमुपनिषद् इति। उपनिषच्छब्देन च व्याचिख्यासितग्रन्थ प्रतिपाद्यवेद्यवस्तुविषया विद्योच्यते। वेदान्तदर्शनमिदं ज्ञानप्रधानम्। आदौ सत्त्वशुद्ध्यर्थं नित्यनैमित्तिकादिकर्माण्यनुष्ठाय ज्ञाने अधिकृतो भवति प्राणभृत्। "उपनिषद्", "गीता", "ब्रह्मसूत्राणि" इत्येतत् त्रयं "प्रस्थानत्रयी" नाम्ना वेदान्ते प्रथितम्। भूमिभेदं सम्प्राप्य यथा एकैका सरित् बहुधा विभजते तथैव एकमेवेदं वेदान्तदर्शनं बहून् शुद्धान्तःकरणान् आचार्यान् सम्प्राप्य अनेकधाऽभवत्। तच्च अद्वैत-विशिष्टाद्वैत-शुद्धाद्वैत-द्वैत-द्वैताद्वैताचिन्त्यभेदाभेदनाम्ना प्रथितम्।श्रीरामानुजाचार्यः द्रविडदेशान्तर्गते मद्रपुर्याः नातिदूरवर्तिनि श्रीमन्महाभूतपुरी (श्रीपेरुम्बूतूर) नाम्नि अग्रहारे क्रैस्तशकीयैकदशतमे शतके पिङ्गलसंवत्सरस्य मेषचैत्रशुक्लपञ्चम्यां गुरुवासरे आर्द्रानक्षत्रे शेषांशजत्वेन प्रादुरभवत्। यामुनमुनेरेव प्रधानश्शिष्योऽयम्। अस्यापरं नाम "लक्ष्मण" आसीत्। पितुर्नाम "केशवः"। प्रप्रथमतया अयमेव विशिष्टाद्वैतं विश्वस्तरे प्रवारयामास। अयं विशिष्टाद्वैतसम्प्रदायः "श्रीसम्प्रदाय" नाम्ना प्रसिद्धः। अस्य सम्पदायस्य प्रचारोऽधिकतया तामिलप्रान्त एवास्ति। प्राचीनकाले अस्मिन् सम्पदाये द्वादश वैष्णवधर्मप्रचारकाणां नामानि श्रूयन्ते स्म। यथा - सरोयोगिन्, भूतयोगिन्, महद्योगिन्, भक्तिसारः, शठकोपः, मधुरकविः, कुलशेखर, विष्णुचित्तः, गोदा, भक्ताङ्घ्रिरेणुः, योगिवाहनः, परकालश्च। तदनन्तरं षड्वैष्णवाचार्या अभूवन्। रामानुजाचार्यस्य वेदार्थसंग्रहपुस्तके विशिष्टाद्वैतवेदान्तानुयायिनां नामानि उपलभ्यन्ते। तेषु बोधायनः, द्रामिड, टङ्कः, गुहदेवः, कपर्दिः, भारुचिश्चेति प्रमुखाः। एतेषु "नाथमुनिः", तथा तस्य पौत्रः "यामुनाचार्यः" इत्येतौ द्वौ प्रसिद्धौ आस्ताम्। परकालमुनेः शिष्यः नाथमुनिः दशमशतकीयः। अस्य अनुयायिषु लोकाचार्यः, वेदान्तदेशिकः, श्रीनिवासाचार्यश्च प्रमुखाः सन्ति। पञ्चाचार्येभ्यः एषः शास्त्राणि अधीतवान्। ते यथा 1) पेरियानम्बिगल (समाश्रयणद्वयम्), 2) तिरुक्कोटियुर् नम्बिगल् (अष्टाक्षरी) 3)

पेरिअ तिरुमलाइ नम्बिगल् (रामायणम्), 4) तिरुमलाई अन्दान (भगवद्भाष्यम्) 5) अइवरतिरुवरङ्गयेरुमलआर्यार्। अस्य " इत्याख्यौ द्वौ प्रमुखौ शिष्यावास्ताम्। अयं महानुभाबो न केवलं वेदान्तदर्शनस्य प्रचारकोऽपि तु एष रहस्यवादिना भक्तिवादिनाञ्चाल्वारसन्धानां भक्तितत्त्वं तथा पाञ्चरात्रागमतत्त्वमपि स्वविचारधारायामुप-स्थापितवान्। अस्य बहूनि नामानि भवन्ति। यथा इलायश्वरः, रामानुजः, यतिराज, उदयवर, लक्ष्मणमुनिः, गोदाग्रजः, अपनुक्कुसङ्गाझिअलित्थिपेरुमलः, अन्ना, तिरुष्पवइजीर, भाष्याकार इति।

विशिष्टाद्वैतग्रन्थाः बहवो सन्ति। बोधायनः पूर्वमीमांसोत्तर-मीमांसयोरुपरि वृत्ति लिखितवान्। टङ्कमहोदयाः छान्दोग्योपनिषदः उपरि व्याख्यान कृतवन्तः। तामिलप्रबन्धानां संग्राहकस्य नाथमुनेः "न्यायतत्त्वम्", "बोगरहस्यम्" इति ग्रन्थद्वंय सर्वप्राचीन भवति। श्रीरङ्गभगवत सेवकस्य यामुनाचार्यस्य "आगमप्रामाण्यम्", "महापुरुषनिर्णयः", "सिद्धित्रयम्" (आत्मसिद्धिः, संवित्सिद्धिः, ईश्वरसिद्धिरिति), "गीतार्थसंग्रहः", "चतुःश्लोकी", "स्तोत्ररत्नम्", "मायावादखण्डनम्" इत्यादयः प्रसिद्धाः ग्रन्थास्सन्ति। विशिष्टाद्वैत-सिद्धान्तस्य आद्यः प्रवर्तक रामानुजाचार्यो भवति। बादरायणव्यासस्य ब्रह्मसूत्रोपरि "श्रीभाष्यम्" अनेन विरचितम्। यद्विशिष्टाद्वैतवादस्य मूलग्रन्थ इति समालोचकै उच्यते। अस्य नवग्रन्थाः नवरत्ननाम्ना प्रसिद्धाः। ते यथा 1) श्रीभाष्यम् 2) वैकुण्ढगद्यम् 3) श्रीरङ्गगद्यम् 4 शरणागतिगद्यम् 5) वेदान्तसारः 6) वेदान्तदीप: 7) वेदार्थसंग्रहः ४) गीताभाष्यम् १) नित्यग्रन्थम्।

अस्यानुयायिषु बेदान्तदेशिकः सुप्रसिद्धदार्शनिकः कविः व्याख्या-कारश्चासीत्। तेन नैके ग्रन्थाः रचिताः। समालोचकै तेषां विभागीकरणमष्टधा कृतवन्तः। यथा -वेदान्तप्रब्धाः - अव पदशग्रन्थाः अनर्भवन्ति। यथा-संवरमीमांसा, शतदूषणी, अधिकरणसारावली, तत्त्रटीका, व्यायपरिशुद्धिः, व्यायसिद्धाञ्जनम्, तत्त्वमुक्ताकलापम्, निक्षेपरशा, सत्यरित्ररक्षा, यादित्रगखण्डनम्, प्रविकोपनिषत्तात्पर्य-रत्नावती, द्राविडोपनिषत्सारम् इति।

2) व्याख्याग्रन्धाः – चतुः श्लोकी भाष्यम्, स्तोत्ररत्नभाष्यम्, रहस्यरक्षा, गीतार्थसंग्रहरक्षा, तात्पर्यचन्द्रिका, ईशावास्त्रोपनिष-द्भाष्यम्, सर्वार्थसिद्धिः, अधिकरणदर्पणम् इति।

3) नाटकम् - सङ्कल्पसूर्योदयम् इति।

4) काव्यानि - सुभाषितनीयो, यादवाभ्युदयम्, पादुकासहस्रम्, हससन्देशम् इति।

5) अनुष्ठानग्रन्थाः - भगवदाराधनविधिः, यज्ञोपवीतप्रतिष्ठा इति।

6) रहस्यग्रन्थाः – सम्पदायपरिशुद्धिः, तत्त्वपदवी, रहस्यपदवी, तत्त्वनवनीतम्, रहस्यनवनीतम्, तत्त्वमातृका, रहस्यमातृका, तत्त्वसन्देशम्, रहस्यसन्देशम्, रहस्यसन्देशविवरणम्, तत्त्वरत्नावली, तत्त्वरत्नावलीप्रतिपाद्यसंग्रहम्, रहस्यरत्नावली, रहस्यरत्नावली-हृदयम्, तत्त्वत्रयचूलकम्, रहस्यत्रयचूलकम्, अभयप्रदानसारम्, रहस्यशिखामणिः, अञ्जलिवैभवम्, प्रदानशतकम्, उपहारसंग्रहम्, सारसंग्रहम्, मुनिवाहनभोगम्, मधुरकविहृदयम्, परमपादसोपानम्, परमतभङ्गम्, हस्तिगिरिमाहात्म्यम्, श्रीमतरहस्यत्रयसारम्, सारासारम्, विरोधपरिहारम्, निगमपरिमलमिति।

7) तामिळषबन्धाः - अमृतरञ्जनी, अधिकारसंग्रहम्, अमृतास्वादिनी, परमपदसोपानम्, परमतभङ्गम्, मेइविरतमानमियाम, अदैकल-ण्ण्ड्डु, अरुत्तपञ्चकम्, स्रोवैष्णवदिनचरो, तिरुच्चिन्त्रमलाई, पत्रिरु-नामम, तिरुमन्त्रचुरुक्कु इत्यादिः।

8) स्तोत्राणि - गोदास्तुतिस्तथा काञ्चीपुर भगवत्परकस्तोत्राणि च नैकानि रचितानि।

वेदान्तदेशिकं विहाय पिल्लाईलोकाचार्यस्य अष्टादशरहस्यग्रन्थाः, तथा गद्यत्रयव्याख्या प्रसिद्धाः सन्ति। अपरः विशिष्टाद्वैतदार्शनिकः श्रीनिवासाचार्यः "यतीन्द्रमतदीपिका" इति ग्रन्थमपि रचितवान्। गुजुराटप्रान्ते विशिष्टाद्वैतवेदान्तस्य शाखाभूतः स्वामिनारायण-सम्यदायः स्वामिनारायणमहोदयेन स्थापितः। तस्य "शिक्षापत्री", "वचनामृतञ्चे" ति ग्रन्थद्वयं प्रसिद्ध भवति। एवमनेकेऽनुयायिनोऽने-काभिर्भाषाभिरस्य सम्पदायस्य तत्त्वबिन्दूनां व्याख्यानं केनोपनिषदः तृतीयखण्डे अहंकारोन्मत्तानां विभिन्नैः उदाहरणैः विज्ञापितमस्ति यत्संसारे ये केचित् प्राणिनः वा पदार्थाः मनोहराः शक्तिशालिनः रमणीयाः प्रियाश्च प्रतीयन्ते तेषु सर्वेषु परब्रह्मणः अंशस्यैव महिमा विद्यमानोऽस्ति। यदि कोऽपि स्वशक्तिमत्त्वं मन्यते, तर्हि अयं तस्य महान् दोषो भविष्यति।

यदा परब्रह्मपरमात्मा सर्वदेवेषु अनुग्रहं विधाय तेभ्यः शक्तिमददात् तथा तया शक्त्या च तैः असुराः विजिताः तदानीं देवाः स्वशक्ति-अभिमान कारणात् महोत्सवम् आयोजयामासुः तत्रोत्सवे स्व-स्व महिमानं ते अवर्णयन्। तेषां मिथ्याभिमानं परमेश्वरम् अवगतवान् तथा भक्तप्रेमी भगवान् देवानाम् अभिमानं दूरयितुं साकारयक्षरूपेण देवानां समक्ष आविर्वभूव। अलौकिकं तेजस्विनम् आश्चर्यमयं यक्षमवलोक्य देवाः परस्परम् उक्तवन्तः 'कोऽयं यक्ष इति'। परस्परं विचार्य ते देवाः अग्निम् अब्रुवन्- 'भवान् जातवेदाः वेदार्थज्ञाता एव परमतेजस्वी असि, अतः यक्षमुपगम्य एतद्विषये संज्ञानमवाप्नोतु। अभिमानी अग्निदेवता यक्षस्य अग्रे समुपस्थितवान्। यक्ष द्वारा पृष्टे

सति अहंकारोन्मत्तः अग्निः स्वपरिचयं दत्तवान-सुप्रसिद्धः अग्निः अस्मि मम रहस्यमयं नाम जातवेदा अस्ति। अग्नेः गवक्ति श्रुत्वा यक्षरूपधारी परमेश्वर उवाच- 'भवतः का शक्तिरस्ति किं कर्तुं प्रभवति'। तदा अग्निः गर्वेण उक्तवान् अहम् इदं सर्व दहेयम् यदिदं पृथिव्यां विद्यते। तदा अग्नेः शक्तिपरीक्षार्थं यक्षः एकं शुष्कं तृणं तस्य समक्षं निदधौ अकथयत् च- 'एतद् दह'। अग्निः स्वपूर्णशक्तया तद् अपप्रेयाय, परन्तु तद् दग्धुं समर्थो न जातः।

वस्तुतः अग्निः इदं न ज्ञातवान् यत्तस्मिन् यद् अग्निमत्वमस्ति, यद् दहनसामर्थ्यमस्ति, सा शक्तिस्तु परमात्मनः सकाशात् सम्प्राप्ताऽस्ति। अग्निः विलज्जितः सन् देवानामन्तिकं प्रतिनिवृत्तः। स अकथयत्- अहं सक्षमभिज्ञातुमसमर्थोऽस्मि। तदनन्तरम् अगाधशक्तिमान् वायुः निर्धारितः। वायुः यक्षमुपागच्छत्। स अहंकारेण अब्रवीत् - अहं मातरिश्वा अस्मि। यक्षे कथिते सति अनिलः तृणम् एव तृणमिव भूमण्डलम् आदातुं पूर्णवेगतः स्वशक्ति प्रयुक्तवान्। परन्तु एव करणे असमर्थः भूत्वा विलज्जितः सन् प्रतिनिवृत्तः। अन्ते इदं कार्यं सम्पादयितुं देवेन्द्रः निर्धारितः। इन्द्रः यक्षस्य समीपे यदैव अगच्छत्, यक्षः तिरोबभूव। अन्यदेवानामपेक्षया इन्द्रे अभिमानमधिकमासीत्, अतः तेन सह वार्ता कर्तुं यक्षः अवसरं न अददात्। यद्यपि इन्द्रः सर्वप्रकारेण अधिकारी आसीत् परन्तु तस्य कृते ब्रह्तत्त्वज्ञानमावश्यकं मत्वा यक्षः। स्वयम् अन्तर्हितोऽभवत्। यक्षेऽन्तर्हिते सति इन्द्रः तत्रैव अवस्थितवान् इदानीमेव परमशोभामयी तेजोमयी देवी उमा तस्य समक्षं प्राकटयत्। इदं परब्रह्मद्वारा इन्द्रस्योपरि कृपायाः फलमासीत्। तदन्तरम् इन्दः भक्तिपूर्वकम्।

स्व-शक्ति-अभिमानं परित्यज्य' युष्माकं विजयः तस्यैव महिमा इति तथा तुभ्यं वास्तविकं ज्ञानं प्रदातुं मां प्रेरितामकरोत् अतः 'युष्माभिः : अवगन्तव्यम् । इत्थं देवतासु सर्वप्रथमम् इन्द्रस्यैव मनसि इदं ज्ञानं प्रकटितमभवत यद् यक्षरूपेण स्वयं परब्रह्मपरमात्मा एव आविर्भूतोऽभवत्।

इत्थं यै सौभाग्यशालिभिः महापुरुषैः केनचित् कारणेन भगवतः दिव्यसंस्पर्शस्य सौभाग्यमवाप्तम् ते धन्याः ज्ञातव्याः। तथाऽच कथायां सर्वप्रथमम् अग्नि-वायुभ्या ब्रह्मणः दर्शनस्य तेन सह वार्तालापस्य सौभाग्यमवाप्तम् अतस्त अपि देवतासु वन्दनीयौ पूजनीयौ च स्तः इन्द्रेणापि यक्षस्य दर्शनं कृतम् अतः इमे त्रयो देवाः वन्दनीयाः सन्ति। अत्र इन्द्रस्य श्रेष्ठत्वं वर्णितमस्ति ।

अग्नि-वायुभ्यां यक्षरूपेण ब्रह्मणः दर्शनस्य सौभाग्यन्तु प्राप्तम् परन्तु तयोः ब्रह्मज्ञानं नाभवत् ब्रह्मणः स्वरूपं नावगतम्। भगवत्याः उमायाः अनुग्रहेण तस्याः उपदेशेन सर्वप्रथमम् इन्द्र एव सर्वशक्तिमतः ब्रह्मणः ज्ञानमवाप्तवान् तत्पश्चात् अग्नि-वायु-आदि-देवैः ब्रह्म ज्ञातम्। ब्रह्मणासह वार्तालापेन एव ब्रह्मणः तत्त्वज्ञानेन अग्नि-वायु-इन्द्र-देवतानां श्रेष्ठत्वं वर्णितम्। परन्तु अत्र इन्द्रस्य श्रेष्ठत्वमधिकं यतः परमात्मनः। महाशक्तिभूतया उमया इन्द्राय स्वयं ब्रह्मविज्ञानं प्रदत्तम्। इत्थम् इन्द्रः एव देवेषु वरिष्ठः।

यदा साधकस्य हृदये ईश्वरदर्शनस्य तीव्रेच्छा उत्पद्यते तदानीं तस्य उत्कण्ठां अधिकं तीव्रां विधातुं स्वस्वरूपस्य किञ्चिद् दिग्दर्शनं कारयित्वा परमात्मा अन्तर्हितः भवति। अतः इन्द्रस्य अग्रतः दिव्यः यक्षसः अन्तर्हितोऽभवत्।

स आनन्दस्वरूपः परमात्मा सर्वेषाम् अत्यन्तं प्रियः अस्ति। सर्वे प्राणिनः येन केनापि प्रकारेण तमेव इच्छन्ति। परन्तु स्वहृदये निवसन्तमपि तं नाभिजानन्ति, ते सुखस्वरूपं तमनुसन्दधाना अपि दुःखरूपेषु विषयेष्वेव भ्राम्यन्ति तमवाप्तुं न प्रभवन्ति । इदं रहस्यमवगत्य साधकः तं परब्रह्म परमात्मानं प्राणिमात्रस्य प्रियमवगम्य तस्य नित्यम् अचलम् अमलम् अनन्तम् परमानन्दस्वरूपं निरन्तरं चिन्तयेत्। एवमभ्यासेन यदा सः आनन्दस्वरूपं सर्वप्रियं परमात्मानं साक्षात्करोति तदा सः स्वयमपि आनन्दमयो भवति- 'ब्रह्मविद् ब्रह्मैव भवति'।

इत्थं यः ब्रह्मविद्यायाः रहस्यमवगच्छति, सः समस्तपापानाम् परमात्मसाक्षात्कारे प्रतिबन्धकरूपत्वात् समस्तशुभाशुभकर्मणाम् अशेषतः विनाशं कृत्वा नित्यं सत्यं सर्वश्रेष्ठं परमधाम अध्यास्ते। कदापि ततो न निवर्तते सनातनरूपेण तत्रैव प्रतिष्ठति तत्रैव प्रतितिष्ठति

**सहायकग्रन्थसूची**

**ग्रन्थाः ग्रन्थकर्ता/सम्पादकः/व्याख्याकारः/प्रकाशनसंस्था - समयश्च**


- ईशादि नौ उपनिषद्, (सानुवाद शाङ्करभाष्यसहित), गीताप्रेस, गौरखपुर।
- उपनिशत्सु ज्ञानस्वरूपविवेचनम्, डा.के. अरविन्दराव्, राष्ट्रिय-संस्कृतविद्यापीठम्, तिरुपतिः 2012।
- बृहदारण्यकोपनिषत् भाष्यवार्तिकम्, सुरेश्वराचार्याः - महेष अनुसन्धान संस्थान वाराणसी 1982।
- उपनिषद् दर्शन का रचनात्मक सर्वेक्षण, रामचन्द्रदत्तात्रेय रनाडे, जयपुर – 1977।
- ईशोपनिषद् भाष्य कुसुमाञ्जली (कुसुमाञ्जली नामक हिन्दी व्याख्या), पं. शिवनारायण शास्त्री, परिमल पब्लिकेशन्स, दिल्ली।
- कठोपनिषद् (हिन्दी शाब्दार्थः, अग्रेसी अनुवाद सहित), व्याख्याकर डा. रामरङ्ग शर्मा, भारतीय विद्या प्रकाशन, दिल्ली -1999।
- ईशादि नौ उपनिषद्, (हिन्दी अनुवाद सहित), व्याख्याकार हरिकृष्णदास गोयन्दका, गीताप्रेस, गोरखपुर।
- ईशावास्योपनिषद्(शाङ्करभाष्य, अन्वय, शब्दार्थःतथा विशेष), व्याख्याकार विजय शङ्कर पाण्डेय, मोतीलाल बनारसीदास, दिल्ली -2014।
- केनोपनिषद् (मन्त्र, पदच्छेद, अन्वय, शब्दार्थ, भावार्थ, व्याख्या और अंग्रजी अनुवाद), आहिताग्नि यमुनाप्रसाद त्रिपाठी, मोतीलाल बनारसीदास, दिल्ली।